मोदते" हरिभक्तिविलासे । "तुलसी घ्राणमात्रेण रुष्टा भवति सुन्दरी" तन्त्रसा० । [अण् । बर्व्वर्य्यां (बावुइ) रत्नमा०

**तुलसीद्वेषा** स्त्री तुलसीं द्वेष्टि तुल्यगन्धत्वात् स्पर्द्धते द्विष–

**तुला** स्त्री तुल–भिदा० अङ् । १सादृश्ये २माने च गृहाणां ३दारुबन्धनार्थपीठिकायां ४पलशतमाने ५भाण्डे च मेदि० । राशिचक्रस्य द्वादशधा विभक्तस्य ६सप्तमे राशौ स च ३६० अंशात्मकराशिचक्रस्य १८१ अंशावधि २१० पर्य्यन्तः चित्राशेषार्द्धस्वातिविशाखान्तिमपादत्रयात्मकः । अस्याधिष्ठाता तुलाधरः पुरुषः । अस्य योगतारादिकम् अश्लेषाशब्दे उक्तम्नक्षत्रशब्दे च विशेष उक्तः । "तौलीना कथितस्तुलाघटधरः" जातकपद्धतिः । "पुमांश्चरश्चितसमोदयोमतः प्रत्यक् मरुत् स्निग्धरवोऽथ वन्यः । स्वल्पप्रजासङ्गमशूद्र उग्रस्तुला द्युवीर्य्यो द्विपदः समानः" जातकपद्धत्युक्तस्वभावः । वादिप्रतिवादिनोर्लौकिकप्रमाणाभावे दिव्यपरीक्षया अर्थनिर्णये कर्त्तव्ये घटापरनामके ७परीक्षाभेदे । सा च परीक्षा दिव्यशब्दोक्तसामान्यविधिपूर्वकं सर्वं कृत्वा कर्त्तव्या । तद्विधिश्च वीरमित्रोदये दर्शितो यथा

पितामहः "विशालासुच्छ्रितां शुभ्रां घटशालान्तु कारयेत् । यत्रस्थो नोपहन्येत श्वभिश्चाण्डालवायसैः । कपाटवीजसंयुक्तां परिचारकरक्षिताम् । पानीयादिसमायुक्तामशून्यां कारयेन्नृपः" इति । वीजानि यवव्रीह्यादीनि । घटार्थानि काष्ठानि नारद आह "खादिरं कारयेत्तत्र निर्व्रणं शुष्कवर्जितम् । शांशपन्तदभावे वा सालं वा कोटरैर्विना । "अर्जुनन्तिन्दुकी सारन्तिणिसो रक्तचन्दनम् । एवंविधानि काष्ठानि घटार्थं परिकल्पयेत्, । अर्जुनस्तिलकः शाकस्तिणिसो रक्तचन्दनम्" इति । माधवीये पाठः । शांशपमिति शिंशपावृक्षसम्बन्धि । "देविकाशिंशपेति" पाणिनिस्मरणादिकारस्याकारः । एवंविधानीत्यन्यस्याप्योदुम्बरादेर्यज्ञियस्य काष्ठस्य ससारस्य ग्रहणम्" । अतएव पितामहः "छित्त्वा तु यज्ञियं काष्ठं यूपवन्मन्त्रपूर्वकम् । प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः । मन्त्रः सौम्यो वानस्पत्यः छेदने जप्य एव चेति" । यूपवन्मन्त्रपूर्वकमित्यनेन ओँ ओषधे त्रायस्वैनमित्यादिच्छेदनमन्त्रप्रयोगादिकमुक्तम् । वानस्पत्यः "वनस्पते शतवल्शोविरोहेति" मन्त्रः । छेदने कृते इति शेषः । वानस्पत्यच्छेदनानन्तरं प्रयोगे यूपवदित्यतिदेशाल्लिङ्गेऽपि पुनर्विधानम् औपदेशिकस्य सोमदैवत्येनातिदेशिकस्य तस्य बाधनिवृत्त्यर्थम् । अत्र जप्य एव चेति चशब्दस्य वानस्पत्येत्यनेनान्वयात् तस्य च समुच्चयद्योतकत्वात्समुच्चय इति केचित् सौम्यवानस्पत्ययोरेकार्थत्वात् । "तुल्यार्थास्तु विकल्पेरन्नित्यनेन" माषेणैव व्रीहियवादिभ्यः" इत्यपरे । पितामहः "प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे घटः सदा । इन्द्रस्थाने सभायां वा धर्मस्थाने चतुष्पथे" इति । घटनिर्माणप्रकारन्तत्प्रमाणञ्चाह पितामहः, "चतुर्हस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ । अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव चेति" । पादौ तुलाधारकाक्षनामककाष्ठधारणाख्यौ स्तम्भौ तथाविधौ चतुर्हस्तौ । अन्तरं मध्यम् । अध्यर्द्धं सार्धहस्तद्वयम् । अक्षकाष्ठस्य प्रमाणम्पादस्तम्भमध्यप्रमाणाभिधानेनैव सूचितमिति न पृथगुपन्यस्तम् । अन्तरालप्रमाणपर्य्यालोचनया ततः किञ्चिदधिकमक्षकाष्ठं कर्त्तव्यम् । पादस्तम्भयोर्मस्तकप्रदेशाद्यथा बहिर्न निःसरति तथा अक्षकाष्ठङ्कार्य्यमिति स्मृतिचन्द्रिकायाम् । अत्र निखातभागपरित्यागेन पादस्तम्भयोश्चतुर्हस्तत्वाभिधानं ज्ञेयम् । अतएव पितामहः "हस्तद्वयं निखेयन्तु प्रोक्तं सुण्डकयोर्द्वयोः । षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः" इति सुण्डकौ पादस्तम्भौ । हस्तप्रमाणन्दर्शितं कालिकापुराणे "यवानान्तण्डुलैरेकमङ्गुलञ्चाष्टभिर्भवेत् । अदीर्घयोजितैर्हस्तश्चतुर्विंशतिरङ्गुलैः" । इति स्मृत्यन्तरेऽपि "तिर्य्यग्यवोदराण्यष्टा ऊर्द्ध्वांशा व्रीहयस्त्रयः । प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलः" । शारदातिलके "चतुर्विंशत्यङ्गुलाढ्यं हस्तन्तन्त्रविदो विदुः । यवानामष्टभिः क्लृप्तं मानाङ्गुलमितीरितमिति" । हस्तो वितस्तिद्वितयं चतुर्विंशत्यङ्गुलो हस्त इत्यर्थः । यवानां यवतण्डुलानामित्यर्थः । "यवानान्तण्डुलैरिति" स्मरणात् । तुलाया विशेषान्तरमाह पितामहः "चतुरस्रा तुला कार्य्या दृढ़ा ऋज्वी तथैव च । कटकानि च देयानि त्रिषु स्थानेषु यत्नतः" इति । कटकानि लोहमयानि वलयानि । त्रिषु स्थानेषु अन्त्ययोर्मध्ये । कटकग्रहणं लोहकीलादीनामुपयुक्तानामुपलक्षणम् । नारदोऽपि "ऋज्वी घटतुला कार्य्या खादिरी तैन्दुकी तथा । चतुरस्रा त्रिभिः स्थानैर्घटकर्कटकादिभिरिति" । घटो घटमध्यम् । कर्कटकौ अन्त्यौ । पादस्तम्भादीनां स्थूलता तु विशेषानभिधानात् यावति